ब्रह्मस्थाने ततो मन्त्री कलसं स्थाप्य पूजयेत् ।
तस्मिंश्चतुर्म्मुखं देवं प्राजेशं मन्त्रविग्रहम् ॥
गन्धैः पुष्पैश्च धूपैश्च नैवेद्यैः सुमनोहरैः ।
ततो मण्डलवाह्ये तु प्रतीच्यां प्राङ्मुखः स्थितः ॥
आचार्य्यो गृह्य सम्भारं ब्रह्मादींस्तर्पयेत् सुरान् ।
प्राजेशं तर्पयेद्विद्वान् आहुतीनां शतेन च ॥
इतरान् दशभिर्देवानाहुतिभिः प्रतर्पयेत् ।
ततः प्रणम्य विज्ञाप्य कृत्वा वै स्वस्तिवाचनम् ॥
प्रगृह्य कर्करीं सम्यङ्मण्डलान्तःप्रदक्षिणम् ।
सूत्रमार्गेण देवेन तोयधारेण कारयेत् ॥
पूर्ववत् तेन मार्गेण सप्तबीजानि वापयेत् ।
आरम्भं तेन मार्गेण तस्य खातस्य कारयेत् ॥
ततो गर्त्तं खनेन्मध्ये हस्तमानप्रमाणतः ।
चतुरङ्गुलमात्रं तदधः खन्यात् सुसम्मितम् ॥
गोमयेन प्रलिप्याथ चन्दनेन विलेपितम् ।
मध्ये दत्त्वा तु पुष्पाणि शुक्लान्यक्षतमेव च ॥
आचार्य्यः प्राङ्मुखो भूत्वा ध्यायेद्देवं चतुर्म्मुखम् ।
तूर्य्यमङ्गलघोषेण ब्रह्मघोषरवेण च ॥
अर्घ्यं दद्यात् सुरश्रेष्ठ कुम्भतोयेन मन्त्रवित् ।
प्रगृह्य कर्करीं तान्तु तत् खातं पूजयेज्जलैः ॥
सर्व्वरत्नसमायुक्तैर्विमलैश्च सुगन्धिभिः ।
तस्मिन् पुष्पाणि शुक्लानि प्रक्षिपेदोमिति स्मरन् ॥
नदावर्त्तं परीक्षेत दधिभक्तान्वितं क्षिपेत् ।
शुभं स्याद्दक्षिणावर्त्तेऽशुभं वामे भवेत्ततः ॥
बीजैः शालियवादीनां गर्त्तं तं पूरयेत्ततः ।
चित्राभिः पवित्राभिर्मृद्भिर्गर्त्तं प्रपूरयेत् ॥
एवं निष्पाद्य विधिना वास्तुयागं सुरोत्तम ।
सुवर्णं गाश्च वस्त्रञ्च आचार्य्याय निवेदयेत् ॥"
इतरानीशादीन् होमस्तु प्रणवादिस्वाहान्त-
तत्तन्नामभिः । तथा च विष्णुधर्म्मोत्तरे ।
"एकैकां देवतां राम समुद्दिश्य यथाविधि ।
चतुर्थ्यन्तेन धर्म्मज्ञो नाम्ना च प्रणवादिना ।
होमद्रव्यमथैकैकं शतसङ्ख्यन्तु होमयेत् ॥"
शतसङ्ख्यमिति पूर्व्वोक्तवचनानुसारेण वास्तु-
यागेतरपरम् । स्मृतिः ।
"स्वाहावसाने जुहुयात् ध्यायन् वै मन्त्रदेव-
ताम् ॥"
होमदक्षिणासम्प्रदानमाह छन्दोगपरिशिष्टम् ।
"ब्रह्मणे दक्षिणा देया यत्र या परिकीर्त्तिता ।
कर्म्मान्तेऽनुच्यमानायां पूर्णपात्रादिका भवेत् ॥
विदध्याद्धौत्रमन्यश्चेद्दक्षिणार्द्धहरो भवेत् ।
स्वयञ्चेदुभयं कुर्य्यादन्यस्मै प्रतिपादयेत् ॥"
अन्यो यजमानभिन्नः । उभयं ब्रह्मकर्म्म होतृ-
कर्म्म च । उपसंहारे वास्तुयागमिति श्रुतेः
सङ्कल्पवाक्ये तेनैवोल्लेखमाचरन्ति । अत्र
मिलितामिलितदक्षिणादानात् पक्षतार-
तम्यम् । * । मात्स्ये ।
"ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत् ॥"
देवीपुराणम् ।
"कालब्रह्मपती पूज्यौ वैष्णवान् शक्तितोऽर्च्चयेत् ।
ब्राह्मणान् भोजयित्वा तु नृत्यगीतादि कारयेत् ॥
प्रासादं कारयेद्विद्वान् गृहं वापि मनोहरम् ।
कार्य्यस्तु पञ्चभिर्व्विल्वैर्व्विल्वबीजैरथापि वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुयागे बलिं हरेत् ॥"
इति मत्स्यपुराणे होमान्ते बलिविधानात्
अत्रापि होमं कृत्वा बल्यादिप्रागुदितसर्व्वकर्म्म-
करणाचारः । * । अत्र प्रजापतिनामाग्निः ।
"प्रतिष्ठायां लोहितश्च वास्तुयागे प्रजापतिः ।
जलाशयप्रतिष्ठायां वरुणः समुदाहृतः ॥"
इति मत्स्यसूक्तवचनात् । एकाशीतिपदवास्तु-
यागे मत्स्यपुराणम् । भूम्यधिकारे ।
"पञ्चगव्यौषधिजलैः परीक्षित्वा तु सेचयेत् ।
एकाशीतिपदं कृत्वा रेखाभिः कनकेन तु ॥
पश्चात्पिष्टेन चालिप्य सूत्रेणालोक्य सर्व्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ।
सर्व्ववास्तुविभागे तु विज्ञेया नवधा नव ॥"
पञ्चगव्यमन्त्रमाह शङ्खः ।
"गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ।
तेजोऽसीति घृतञ्चैव देवस्य त्वा कुशोदकम् ॥"
ओषधीराह कात्यायनः ।
"ब्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः ।
यवाश्चौषधयः सप्त विपदो घ्नन्ति धारिताः ॥"
ब्रीहिः शरत्पक्वधान्यं षष्टिकाख्यम् । शालयो
हैमन्तिकाः । दशेति वास्तुमण्डलवायव्ये उप-
विश्य पूर्व्वाभिमुखो गुरुः उत्तरत आरभ्य दश-
रेखाः प्राङ्मुखीर्यथादक्षिणं कुर्य्यात् । एवं
नैरृत्यामुपविश्य पश्चिमतः पूर्व्वापरगा दशो-
त्तरायता रेखाः कुर्य्यात् कनकशलाकादिना ।
रुद्रयामले तासां नामानि ।
"शान्ता यशोवती कान्ता विशाला प्राण-
वाहिनी ।
सती सुमनसा नन्दा सुभद्रा सुरथा तथा ॥"
इत्याद्या दश रेखाः ॥
"हिरण्या सुव्रता लक्ष्मीर्विभूतिर्विमला प्रिया ।
जया कला विशोका च इडा संज्ञा दशो-
त्तराः ॥"
इत्यन्ता दश रेखाः ॥
"एकाशीतिपदं कृत्वा वास्तुवित् सर्व्ववास्तुषु ।
पदस्थान् पूजयेद्देवान् त्रिंशत् पञ्चदशैव तु ॥
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश ।
नामतस्तानि वक्ष्यामि स्थानानि च निबोध मे ॥
ईशानकोणादिषु तान् पूजयेच्च विधानतः ।
शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः ॥
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ।
पूषा च वितथश्चैव गृहक्षतयमावुभौ ॥
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ॥
असुरः शोषपापौ च रोगोऽहिर्म्मुख्य एव च ।
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ॥
बहिर्द्वात्रिंशदेते च तदन्तश्चतुरः शृणु ।
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः ॥
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ।
मध्ये नवपदे ब्रह्मा तस्याष्टौ च समीपगाः ॥
सर्व्वानेकान्तरान् विद्यात् पूर्व्वाद्यान्नामतः शृणु ।
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ॥
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ।
अष्टमश्चापवत्सश्च परितो ब्रह्मणः स्मृताः ॥
आपश्चैवापवत्सश्च पर्जन्योऽग्निर्दितिस्तथा ।
पादिकानाञ्च वर्गोऽयमेवं कोणेषु घोषतः ॥
तन्मध्ये तु बहिर्विंशद्विपदास्ते तु सर्व्वतः ।
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ॥"
एवमिति यथा ईशानकोणे कोष्ठचतुष्टये अन्त-
स्थितैककोष्ठसहिते देवतापञ्चकमेवमाग्नेयादि-
कोणेष्वपीत्यर्थः । दिक्षु पूर्व्वादिदिक्षु । * ।
"वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक् ।
वायुं यावत् तथा रोगात् पितृभ्यः शिखिनं
पुनः ॥
मुख्याद्भृशमथो शोषाद्वितथं यावदेव तु ।
सुग्रीवाददितिं यावद्भृङ्गाज्जयन्तमेव च ॥
एते वंशाः समाख्याताः क्वचिज्जठर एव च ।
एतेषां चैव सम्पातः पदमध्ये समस्तथा ॥
मर्म्म चैतत् समाख्यातं त्रिशूलं कोणगं च यत् ।
स्तम्भन्यासेषु वर्ज्यानि तुलाविधिषु सर्व्वदा ॥
कीलोच्छिष्टोपघातानि वर्ज्जयेत् यत्नतो नरः ।
सर्व्वत्र वास्तुर्निर्द्दिष्टः पितृवैश्वानरायतः ॥
मूर्द्धन्यग्निः समाविष्टो मुखे चापः समाश्रितः ।
पृथ्वीधरोऽर्य्यमा चैव स्तनयोस्तावधिष्ठितौ ॥
वक्षःस्थले चापवत्सः पूजनीयस्तथा बुधैः ।
नेत्रयोर्दितिपर्ज्जन्यौ श्रोत्रे दितिजयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ च पूजनीयौ प्रयत्नतः ।
सोमसूर्य्यादयस्तद्वद्बाह्वोः पञ्च च पञ्च च ॥
रुद्रश्च राजयक्ष्मा च वामहस्तसमाश्रितौ ।
सावित्रः सविता तद्वद्धस्तं दक्षिणमाश्रितौ ॥
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च हस्तयोर्म्मणिबन्धके ॥
तथैवासुरशेषौ च वामपार्श्वं समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वद्वितथः सगृहक्षतः ॥
ऊर्व्वोर्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्भृङ्गसुग्रीवौ कच्यां दौवारिको मृगः ॥
जयः शक्रस्तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये स तु पूज्यते ॥
चरकीञ्च विदारीञ्च पूतनां पापराक्षसीम् ।
ईशान्यादिकोणेषु मण्डलाद्बाह्यतो यजेत् ॥"
पितृभ्य इति पितृगणादारभ्य वह्निं यावत् यो
वंशः प्रसारितस्तद्वदायतो वास्तुपुरुषः । अम्बुपो
वरुणः । पुष्पकः पुष्पदन्तः । तथा ।
"प्रदक्षिणन्तु कुर्व्वीत वास्तोः पदविलेखनम् ।"
कोष्ठानां लिखनं प्रदक्षिणं कार्य्यम् । तथा ।
"तर्ज्जनी मध्यमा चैव तथाङ्गुष्ठश्च दक्षिणः ।
प्रवालरत्नकनकं फलपुष्पाक्षतोदकम् ।
सर्व्वेषु वामभागेषु शस्तं पदविलेखने ॥" * ।
तथा ।
"वास्तौ परीक्षिते सम्यग् वास्तुदेहे विचक्षणः ।
वास्तूपशमनं कुर्य्यात् समिद्भिर्बलिकर्म्मणा ॥